# * रुचिरा भाग 2 दशमः पाठः

## विश्वबन्धुत्वम्



मुरारी लाल शर्मा

उत्सवे, व्यसने, दुर्भिक्षे, राष्ट्रविप्लवे, दैनन्दिनव्यवहारे च यः सहायतां करोति सः बन्धुः भवति। यदि विश्वे सर्वत्र एतादृशः भावः भवेत् तदा विश्वबन्धुत्वम् सम्भवति।

(अनुवाद) - उत्सव में, संकट में, अकाल में, राष्ट्र पर मुसीबत आने पर और प्रतिदिन के व्यवहार में जो सहायता करता है वह बन्धु होता है। यदि संसार में सब जगह ऐसा भाव हो तब संसार में भाई चारा सम्भव होता है।

परन्तु अधुना निखिले संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति। मानवाः परस्परं न विश्वसन्ति। ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति। अपि च समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति, तेषाम् उपरि स्वकीयं प्रभुत्वं स्थापयन्ति। संसारे सर्वत्र विद्वेषस्य, शत्रुतायाः, हिंसायाः च भावना दृश्यते। देशानां विकासः अपि अवरुद्धः भवति।

(अनुवाद) - परंतु अब पूरे संसार में झगड़े का और अशांति का वातावरण है। मनुष्य आपस में विश्वास नहीं करते हैं।वे दूसरे के कष्ट को अपना कष्ट नहीं मानते हैं। और भी समर्थ देश असमर्थ देशों के प्रति उपेक्षाभाव प्रदर्शित करते हैं, उनके ऊपर अपना प्रभुत्व स्थापित करते हैं। संसार में सब जगह द्वेष की, शत्रुता की और हिंसा की भावना दिखाई देती है। देशों का विकास भी रुक जाता है।

इयम् महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन सह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं कुर्यात्। विश्वस्य जनेषु इयं भावना आवश्यकी। ततः विकसिताविकसितयोः देशयोः मध्ये स्वस्था स्पर्धा भविष्यति। सर्वे देशाः ज्ञानविज्ञानयोः क्षेत्रे मैत्रीभावनया सहयोगेन च समृद्धिं प्राप्तुं समर्थाः भविष्यन्ति।

(अनुवाद) यह बड़ी आवश्यकता है कि एक देश दूसरे देश के साथ निर्मल हृदय से मित्रता का व्यवहार करे। संसार के मनुष्यों में यह भावना आवश्यक है। तत्पश्चात् विकसित और अविकसित देशों के मध्य में स्वस्थ स्पर्धा होगी। सब देश ज्ञान और विज्ञान के क्षेत्र में मित्रता की भावना से और सहयोग से समृद्धि को प्राप्त करने में समर्थ होंगे।

सूर्यस्य चन्द्रस्य च प्रकाशः सर्वत्र समानरूपेण प्रसरति। प्रकृतिः अपि सर्वेषु समत्वेन व्यवहरति। तस्मात् अस्माभिः सर्वैः परस्परं वैरभावम् अपहाय विश्वबन्धुत्वं स्थापनीयम्।

(अनुवाद) सूर्य और चन्द्रमा का प्रकाश सब जगह समान रूप से फैलता है। प्रकृति भी सब में समान रूप से व्यवहार करती है। इसलिए हमारे द्वारा आपस में वैरभाव को छोड़कर के विश्वबन्धुता (भाईचारे) की भावना को स्थापित करना चाहिए।

अतः विश्वस्य कल्याणाय एतादृशी भावना भवेत् -

(अनुवाद) अतः संसार के कल्याण के लिए ऐसी भावना हो -

*अयं निजः परो वेति गणना लघुचेतसाम्।*
*उदारचरितानां तु वसुधैव कुटुम्बकम्।।*

(अनुवाद) - यह मेरा है अथवा दूसरे का इस प्रकार गिनती करना छोटे मन वालों का काम है। उदार मन वालों की तो पृथ्वी ही परिवार है।

# शब्दार्थाः

| **शब्दाः** | **अर्थाः** |
|---|---|
| दुर्भिक्षे | अकाल में |
| दैनन्दिनस्यवहारे | प्रतिदिन के व्यवहार में |
| व्यसने | संकट में |
| कलहस्य | झगड़े का |
| निखिले | सम्पूर्ण |
| विद्वेषस्य | ईर्ष्या के |
| ज्ञानविज्ञानयोः | ज्ञान और विज्ञान में |
| प्रसरति | फैलती है |
| अपहाय | छोड़कर |
| वैरभावम् | वैरभाव |
| लघुचेतसाम् | छोटे मन वालों का |
| निजः | मेरा |
| वा | अथवा |
| उदारचरितानाम् | उदार मन वालों के |
| वसुधा | पृथ्वी |
| कुटुम्बकम् | परिवार |

# अभ्यास-प्रश्नोत्तराणि

**1. उच्चारणं कुरुत -**

दुर्भिक्षे, विश्वसन्ति, ध्यातव्यम्, राष्ट्रविप्लवे, उपेक्षाभावम्,
दुःखभाक्, विश्वबन्धुत्वम्, विद्वेषस्य, प्रदर्शयन्ति

**2. मञ्जूषातः समानार्थकपदानि चित्वा लिखत -**

| | | | |
|---|---|---|---|
| परस्य, | दुःखम्, | आत्मानम्, | बाधितः, |
| परिवारः | सम्पन्नम् | त्यक्त्वा, | सम्पूर्णे |

| | | | | | |
|---|---|---|---|---|---|
| स्वकीयम् ----- | | | **स्वकीयम्** | - | **आत्मानम्** |
| अवरुद्धः ----- | | | **अवरुद्धः** | - | **बाधितः** |
| कुटुम्बकम् ---- | | | **कुटुम्बकम्** | - | **परिवारः** |
| अन्यस्य ---- | | **उत्तरम्** ⟶ | **अन्यस्य** | - | **परस्य** |
| अपहाय ---- | | | **अपहाय** | - | **त्यक्त्वा** |
| समृद्धम् ---- | | | **समृद्धम्** | - | **सम्पन्नम्** |
| कष्टम् ---- | | | **कष्टम्** | - | **दुःखम्** |
| निखिले ---- | | | **निखिले** | - | **सम्पूर्णे** |

## 3. रेखांकितानि पदानि संशोध्य लिखत -

(क) छात्राः क्रीडाक्षेत्रे कन्दुकात् क्रीडन्ति।
उत्तरम् - छात्राः क्रीडाक्षेत्रे कन्दुकेन क्रीडन्ति।

(ख) ते बालिकाः मधुरं गायन्ति।
उत्तरम् - ताः बालिकाः मधुरं गायन्ति।

(ग) अहं पुस्तकालयेन पुस्तकानि आनयामि।
उत्तरम् - अहं पुस्तकालयात् पुस्तकानि आनयामि।

(घ) त्वं किं नाम?
उत्तरम् - तव किं नाम?

(ङ) गुरुं नमः।
उत्तरम् - गुरवे नमः।

**4. मञ्जूषातः विलोमपदानि चित्वा लिखत -**

अधुना, मित्रतायाः, लघुचेतसाम्,
गृहीत्वा, दुःखिनः, दानवाः

| | | | | |
|---|---|---|---|---|
| शत्रुतायाः ---- | | शत्रुतायाः | - | मित्रतायाः |
| पुरा ----- | | पुरा | - | अधुना |
| मानवाः ---- | | मानवाः | - | दानवाः |
| उदारचरितानाम् | **उत्तरम्** → | उदारचरितानाम् | - | लघुचेतसाम् |
| सुखिनः | | सुखिनः | - | दुःखिनः |
| अपहाय ----- | | अपहाय | - | गृहीत्वा |

## 5. अधोतिखितपदानां लिङ्गम्, विभक्तिं, वचनञ्च लिखत -

### प्रश्न -

| पदानि | | लिङ्गम् | | विभक्तिः | | वचनम् |
|---|---|---|---|---|---|---|
| बन्धुः | | -------- | | -------- | | -------- |
| देशान् | | -------- | | -------- | | -------- |
| घृणायाः | | -------- | | -------- | | -------- |
| कुटुम्बकम् | | -------- | | -------- | | -------- |
| रक्षायाम् | | -------- | | -------- | | -------- |
| ज्ञानविज्ञनयोः | | -------- | | -------- | | -------- |

### उत्तरम् -

| पदानि | | लिङ्गम् | | विभक्तिः | | वचनम् |
|---|---|---|---|---|---|---|
| बन्धुः | | पुंल्लिङ्गम् | | प्रथमा | | एकवचनम् |
| देशान् | | पुंल्लिङ्गम् | | द्वितीया | | बहुवचनम् |
| घृणायाः | | स्त्रीलिङ्गम् | | पञ्चमी/षष्ठी | | एकवचनम् |
| कुटुम्बकम् | | नपुंसकलिङ्गम् | | प्रथमा | | एकवचनम् |
| रक्षायाम् | | स्त्रीलिङ्गम् | | सप्तमी | | एकवचनम् |
| ज्ञानविज्ञनयोः | | नपुंसकलिङ्गम् | | षष्ठी/सप्तमी | | द्विवचनम् |

**6. कोष्ठकेषु दत्तेषु शब्देषु समुचितां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत -**

| | | |
|---|---|---|
| (क) | <u>विद्यालयम्</u> उभयतः वृक्षाः सन्ति। | (विद्यालय) |
| | ---------- उभयतः गोपालिकाः। | (कृष्ण) |
| (ख) | <u>ग्रामं</u> परितः गोचारणभूमिः। | (ग्राम) |
| | ------ परितः भक्ताः। | (मन्दिर) |
| (ग) | <u>सूर्याय</u> नमः। | (सूर्य) |
| | ------- नमः। | (गुरु) |
| (घ) | <u>वृक्षस्य</u> उपरि खगाः। | (वृक्ष) |
| | ------- उपरि सैनिकः। | (अश्व) |

**उत्तरम् -**

(क) <u>विद्यालयम्</u> उभयतः वृक्षाः सन्ति।
<u>कृष्णम्</u> उभयतः गोपालिकाः।

(ख) <u>ग्रामं</u> परितः गोचारणभूमिः।
<u>मन्दिरम्</u> परितः भक्ताः।

(ग) <u>सूर्याय</u> नमः।
<u>गुरवे</u> नमः।

(घ) <u>वृक्षस्य</u> उपरि खगाः।
<u>अश्वस्य</u> उपरि सैनिकः।

**7. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानानि पूरयत -**

(क) ---------- नमः। (हरिं / हरये)

(ख) ---------परितः कृषिक्षेत्राणि सन्ति। (ग्रामस्य / ग्रामम्)

(ग) -------- नमः। (अम्बायाः / अम्बायै)

(घ) ------ उपरि अभिनेता अभिनयं करोति। (मञ्चस्य / मञ्चम्)

(ङ) --------- उभयतः पुत्रौ स्तः। (पितरम् / पितुः)

**उत्तरम् -**

(क) हरये नमः।

(ख) ग्रामम् परितः कृषिक्षेत्राणि सन्ति।

(ग) अम्बायै नमः।

(घ) मञ्चस्य उपरि अभिनेता अभिनयं करोति।

(ङ) पितरम् उभयतः पुत्रौ स्तः।

# धन्यवाद